# चित्रकारस्य कौशलम्

कश्चित् खलो नृपो वामेन नेत्रेण काण आसित्। तस्य सभायामर्जुनो नाम कश्चन कुशलः चित्रकारोऽवर्तत। अथैकदा नरपतिस्तं परीक्षितुमवदत् 'भद्र, त्वं मम एतादृशं चित्रमालिख यत् सर्वेषामेव संतोषकारकं भवेत्। अन्यथा त्वामहं दण्डयेय'। अर्जुनः अवदत्, 'राजेन्द्र, यत् सर्वेषामेव संतोषं जनयेत् तादृशं चित्रमालिखितुं प्रयतेय' इति। किन्तु काणस्य भूपतेः कठिनं समयं चिन्तयित्वा सः अतिव विषण्णोऽभवत्।

अर्जुनो व्यचिन्तयत् "यदि नृपस्य वास्तवं चित्रमालिखेयं, तर्हि चित्रे स्वनयनं काणं दृष्ट्वा अयं मह्यं क्रुध्येत्, मां च दण्डयेत। यदि चित्रेऽस्य काणं नयनं न लिखेयं तर्हि तत् चित्रम् अयथार्थं भवेत्। अतो जना मां निन्देयुः। तत् किम् अधुना अनुष्ठेयम् ? 'इतो व्याघ्र इतस्तटी' इति मेऽवस्था जाता"।

एवं चिन्ताकुलो नृपात् भीतश्च स आत्मानं विनोदयितुम् अरण्यमेकं प्राप्तः। तत्र वामनेत्रं निमील्य शरासनं चाकृष्य खगमेकं हन्तुं सज्जं व्याधम् अपश्यत्। तथा स्थितं तं व्याधं दृष्ट्वा स मुदितश्चित्रकारः अचिन्तयत्, "यदि अहं चित्रे मृगयायां रतं नृपं लिखेयं, तर्हि स मह्यं न क्रुध्येत्, जनाः च मां प्रशंसेयुः।"

नगरम् आगत्य तादृशं चित्रं तेन लिखितम्। ततस्तत् नृपाय समर्प्य विनयेन अवदत् "एतेन चित्रेण अनुग्रहितुम् अर्हति महारजः।" भूपतिः तत् चित्रं दृष्ट्वा अतीव सन्तुष्टः जातः। स चित्रकाराय विपुलं धनं प्रायच्छत्। विस्मिताश्च सर्वे जनाः अवदन् "अहो कौशलमेतस्य चित्रकारस्य पश्यत' इति।